ऋषयस्तत्र बहवो विहृत्य शरदां शतम् ।
तपसा दिवमारूढ़ाः कपालशिरसा सह ॥ २१ ॥
प्रविविक्तमहं मन्ये तं वासं भवतः सुखम् ।
इह वा वनवासाय वस राम ! मया सह ॥ २२ ॥
स रामं सर्वकामैस्तं भरद्वाजः प्रियातिथिम् ।
सभार्य्यं सह च भ्रात्रा प्रतिजग्राह हर्षयन् * ॥ २३ ॥
तस्य प्रयागे रामस्य तं महर्षिमुपेयुषः ।
प्रपन्ना रजनी पुण्या चित्राः कथयतः कथाः ॥ २४ ॥
सीतातृतीयः काकुत्स्थः परिश्रान्तः सुखोचितः ।

तदुपपादयति । ऋषय इति । बहुदिनमृतकपालवत् शुक्लं शिरस्तेन सह तेन विद्यमानेनोपलक्षितास्तपसा शरदां शतं विहृत्य अतिवार्धकेऽपि तपसा क्रीड़ीत्वा दिवं स्वर्गमारूढ़ाः केचित्तु कपालशिरसेति शरीरोपलक्षणं सशरीराः स्वर्गं गता इत्याहुः तन्न धर्मपुत्रादीनामपि कियद्दूरमेव धर्मवैभवदर्शनायैतच्छरीरेण गमनं ततस्तन्निरासपूर्वकमेव स्वर्गगमनश्रवणात् इति कतकः ॥ २१ ॥

वनवासाय वनवासनियमसिद्धये इह वेति शिष्टाचारमात्रम् ॥ २२ ॥

रामं तद्रजन्यां तत्र वसन्तं प्रतिजग्राह,—अतिथियोग्यसत्कारैर्वे प्रीतवान् ॥ २३ ॥

---

* "धर्मवित्" इति वा पाठः ।

## अष्टत्रिंशः सर्गः ।

तस्यां चीरं वसानायां नाथवत्यामनाथवत् ।
प्रचुक्रोश जनः सर्वो धिक् त्वां दशरथन्त्विति ॥ १ ॥
तेन तत्र प्रणादेन दुःखितः स महीपतिः ।
चिच्छेद जीविते श्रद्धां धर्मे यशसि चात्मनः ॥ २ ॥
स निश्वस्योष्णमैक्ष्वाकुस्तां भार्यामिदमब्रवीत् ।
कैकेयि ! कुशचीरेण न सीता गन्तुमर्हति ॥ ३ ॥
सुकुमारी च बाला च सततञ्च सुखोचिता ।
नेयं वनस्य योग्येति सत्यमाह गुरुर्मम ॥ ४ ॥
इयं हि कस्यापकरोति किञ्चित्
तपस्विनी राजवरस्य पुत्री

तस्यामिति । तद्दरानन्तर्गतायामीदृशमर्निष्ठव्यवहारमनिवार्य्य तूष्णीं तिष्ठतीति जनाक्रोशः ॥ १ ॥

तेन प्रणादेन जनाक्रोशेन तां भार्य्यां कैकेयीम् ॥ २ ॥ ३ ॥ ४ ॥

वनस्य वनगमनयोग्यचीरस्य कस्यापि किञ्चित् करोति काकुर-पितु नेत्यर्थः । किञ्चिद्राज्यप्रतिबन्धादि । विसंज्ञा अपरिचिताशक्या-र्थानुष्ठानप्रसङ्गतः प्राप्तमोहा श्रमणीव भिक्षुकीव ॥ ५ ॥

दरिद्रः को भवेदाढ्यो द्रव्यवान्वाप्यकिञ्चनः ॥ २३ ॥
अहञ्च हि मदीयाश्च सर्वे तव वशानुगाः।
न ते कञ्चिदभिप्रायं व्याहन्तुमहमुत्सहे ॥ २४ ॥
आत्मनोजीवितेनापि ब्रूहि यन्मनसि स्थितम्।
बलमात्मनि जानन्ती न मां शङ्कितुमर्हसि ॥ २५ ॥
करिष्यामि तव प्रीतिं सुकृतेनापि ते शपे।
यावदावर्त्तते चक्रं तावती मे वसुन्धरा ॥ २६ ॥
द्राविडाः सिन्धुसौवीराः सौराष्ट्रा दक्षिणापथाः।
वङ्गाङ्गमागधा मत्स्याः समृद्धाः काशिकोशलाः ॥ २७ ॥
तत्र जातं बहुद्रव्यं धनधान्यमजाविकम्।

तदेव प्रपञ्चयति,—अबध्य इत्यादि ॥ २३ ॥

आत्मनो जीवितेन हेतुनापि ते कञ्चिदभिप्रायं तद्विषयं व्याहन्तुं नोत्सहे अतो मनसि यत् स्थितं यद्विषयेच्छास्ति तत् ब्रूहि आत्मनि स्वस्मिन्बलं मत्प्रेमरूपं जानन्ती अयं मदुक्तं करिष्यति न वेति मां शङ्कितुं नार्हसि ॥ २५ ॥

सुकृतेनापि स्वपुण्येनापि ते तव शपे शपथं ददामि यदि त्वदुक्तं न कुर्य्यां तर्हि सर्वं सुकृतं मे हथेति शपथं ददामीत्यर्थः। अथात्मनि दुष्करसम्पादनसामर्थ्यं दर्शयति,—यावदिति। चक्रं सूर्य्यमण्डलं आवर्त्तते प्रकाशयति तावती सर्वापि वसुधा मे मदधीना ॥ २६ ॥

द्राविड़सिन्ध्वादयो देशाः सर्वे मदधीना एव ॥ २७ ॥

